योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः १०४

चतुरुत्तरशततमः सर्गः १०४

श्रीवसिष्ठ उवाच ।

अत्र ते श्रृणु वक्ष्यामि वृत्तान्तमिममुत्तमम् ।

जागतीहेन्द्रजालश्रीश्चित्तायत्ता यथा स्थिता ।। १

अस्त्यस्मिन्वसुधापीठे नानावनसमाकुलः ।

उत्तरापाण्डवो नाम स्फीतो जनपदो महान् ।। २

नीरन्ध्रघनगम्भीरवनविश्रान्ततापसः ।

विद्याधरीकृतलतादोलोपवनपत्तनः ।। ३

वातोद्धूताञ्जकिञ्जल्कपुञ्जपिञ्जरपर्वतः ।

लसत्कुसुमसंभारवनमालावतंसकः ।। ४

करञ्जमञ्जरीकुञ्जगुच्छपर्यन्तजङ्गलः ।

खर्जूरान्तरितग्रामो घुंघुमध्वनिताम्बरः ।। ५

एकपिङ्गशिलाश्रेणीशालिकेदारपिङ्गलः ।

नीलकण्ठारवोद्दामवनजङ्गलमण्डितः ।। ६

सारसारवसंरम्भरणत्कनककाननः ।

तमालपाटलीनीलगिरिग्रामककुण्डलः ।। ७

विचित्रविहगव्यूहविरावकृतकाकलिः ।

नदीपरिसरोन्निद्रपारिभद्रद्रुमारुणः ।। ८

गायत्कलमकेदारदारिकाहृतमन्मथः ।

पुष्पफलचलद्वातव्याधूतकुसुमाम्बुदः ।। ९

दरीगृहविनिष्क्रान्तसिद्धचारणबन्दिकम् ।

स्वर्गादिव समानीय लावण्यमभिनिर्मितः ।। १०

गायत्किन्नरगन्धर्वकदलीखण्डमण्डपः ।

मन्दानिलरवोद्धूतः पुष्पोपवनपाण्डुरः ।। ११

तत्रास्ति लवणो नाम राजा परमधार्मिकः ।

हरिश्चन्द्रकुलोद्भूतो भूमाविव दिवाकरः ।। १२

यद्यशःकुसुमोत्तंसपाण्डुरस्कन्धमण्डलाः ।

तत्र शैला विराजन्ते हाराः प्रोद्धूलिता इव ।। १३

कृपाणशकलोत्कृत्तनिःशेषारातिमण्डलः ।

अरातिलोकः प्राप्नोति यदनुस्मरणाज्ज्वरम् ।। १४

यस्योदारसमारम्भमार्यलोकानुपालनम् ।

चरितं संस्मरिष्यन्ति हरेरिव चिरं जनाः ।। १७

यस्याप्सरोमिरद्रीन्द्रमूर्धस्वमरसद्मसु ।

विकासिपुलकोल्लासं गीयन्ते गुणगीतयः ।। १६

यस्य स्वःसुन्दरीगीता लोकपालचिरश्रुताः ।

विरिञ्चिहंसैर्ध्वन्यन्ते स्वभ्यासाद्गुणगीतयः ।। १७

स्वप्नेष्वपि न सामान्या यस्योदारचमत्कृतिः ।

राम दृष्टा श्रुता वापि दैन्यदोषमयी क्रिया ।। १८

जिह्मतां यो न जानाति न दृष्टा येन धृष्णुता ।

उदारता येन धृता ब्रह्मणेवाक्षमालिका ।। १९

दिनाष्टभागमाकाशमागते दिवसाधिपे ।

स कदाचित्सभास्थाने सिंहासनगतोऽभवत् ।। २०

सुखोपविष्टे तत्रास्मिन्राजनीन्दाविवाम्बरे ।

प्रविशन्तीषु सामन्तसेनासु च ससंभ्रमम् ।। २१

गायन्तीष्वथ कान्तासु सूपविष्टेषु राजसु ।

मनो हरति साह्लादे वीणावंशकलारवे ।। २२
चारुचामरहस्तासु सविलासासु राजनि ।
देवासुरगुरुप्रख्ये विश्रान्ते मन्त्रिमण्डले ।। २३
प्रस्तुतेषु प्रविष्टेषु राजकार्येषु मन्त्रिभिः ।
प्रोक्तासु देशवार्तासु निपुणैश्चारुमन्त्रिभिः ।। २४
इतिह्यसमये पुण्ये वाच्यमाने च पुस्तके ।
पठत्सु च स्तुतीः पुण्याः पुरः प्रह्वेषु वन्दिषु ।। २५
सभां विवेश साटोपः कश्चित्तामैन्द्रजालिकः ।
वर्षेणाहितसंरम्भो वसुधामिव वारिदः ।। २६
स ननाम महीपालं शिखरोदारकन्धरम् ।
पादोपान्तगतः कान्तं शैलं फलतरुर्यथा ।। २७
सच्छायस्योन्नतांसस्य फलिनः पुष्पभासिनः ।
स विवेश पुरो राज्ञस्तरोरग्रे कपिर्यथा ।। २८
चपलो लम्पटोऽर्थानामामोदसुखमारुतम् ।
उवाचोत्कन्धरं भूपं सपद्ममिव षट्पदः ।। २९
विलोकय विभो तावदेकामिह खरोलिकाम् ।
पीठस्थ एव साश्चर्यां व्योम्नि चन्द्र इवावनिम् ।। ३०
इत्युक्त्वा पिच्छिका तेन भ्रामिता भ्रमदायिनी ।
नानाविरचनाबीजं मायेव परमात्मनः ।। ३१
तां ददर्श महीपालस्तेजोरेणुविराजिताम् ।
शक्रः सुरविमानस्थः स्वकार्मुकलतामिव ।। ३२
सभां सैन्धवसामन्तो विवेशास्मिन्क्षणे तदा ।
तारापरिकरापूर्णां व्योमवीथीमिवाम्बुदः ।। ३३
तं चैवानुजगामाश्वः सौम्यः परमवेगवान् ।
देवलोकोन्मुखं तुष्टं शक्रमुच्चैःश्रवा इव ।। ३४
स तमश्वमुपादाय पार्थिवं समुवाच ह ।

सोच्चैःश्रवा इव क्षीरसागरो मरुतां पतिम् ।। ३५

इदमुच्चैःश्रवःप्रख्यं हयरत्नं महीपते ।

जवोड्डुयनशीलेन मूर्तिमानिव मारुतः ।। ३६

अश्वोऽयमस्मत्प्रभुणा प्रभो संप्रहितस्त्वयि ।

राजते हि पदार्थश्रीर्महतामर्पणाच्छुभा ।। ३७

इत्युक्तवति तस्मिंस्तु प्रत्युवाचैन्द्रजालिकः ।

जलदस्तनिते शान्ते चातकोऽम्बुधरं यथा ।। ३८

सदश्वमेनमारुह्य भुवनं विहर प्रभो ।

स्वप्रतापाहितानल्पशोभामुर्वीं रविर्यथा ।। ३९

अश्वमालोकयामास तेनोक्त इति पार्थिवः ।

निर्घातस्तनितं मेघं मयूर इव सूत्करः ।। ४०

अथानिमेषया दृष्ट्या राजा चित्रोपमाकृतिः ।

बभूवालोकयन्नश्वं लिपिकर्मार्पितोपमः ।। ४१

क्षणमालोक्य पीठस्थस्तस्थौ संस्थगितेक्षणः ।

दृष्ट्याऽऽक्षुब्धः समुद्रोऽद्रिमीनकैः करवो यथा ।।४२

तस्थौ मुहूर्तयुग्मं स ध्यानासक्त इवात्मनि ।

वीतरागो मुनिः क्षुब्धः परानन्द इव स्थितः ।। ४३

बोधितः केनचिन्नासौ स्वप्रतापजितोर्जितः ।

धिया कामप्ययं भूयश्चिन्तां चिन्तयतीति च ।। ४४

बभूवुः केवलं तत्र निःस्पन्दसितचामराः ।

चामरिण्यो हि शर्वर्यः स्तम्भितेन्दुकरा इव ।। ४५

विरेजुर्विस्मयापूर्णा निःस्पन्दास्ते सभासदः ।

निःस्पन्दकिञ्जल्कदलाः पद्माः पङ्ककृता इव ।। ४६

प्रशशाम सभास्थाने जनकोलाहलः शनैः ।

प्रशान्तप्रावृषि व्योमन्याम्भोदमिव गर्जितम् ।। ४७

संदेहसागरे मग्ना जग्मुश्चिन्तां सुमन्त्रिणः ।

विषीदति गदापाणावसुराजाविवामराः ।। ४८

विततविस्मितजिह्मितया तया

जनतया भयमोहविषण्णया ।

स्तिमितचक्षुषि भूमिपतौ स्थिते

मुकुलिताज्जवनस्य धृता द्युतिः ।। ४९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे इन्द्रजालोपाख्याने नृपव्यामोहो नाम चतुरुत्तरशततमः

सर्गः ।। १०४ ।।